उपशास्त्री-प्रथमखण्ड साहित्य - तृतीय पत्रम्
काव्यदीपिका

Saathi

Date ___/___/___

प्र०(1) - मम्मटमतानुसारेण काव्यप्रयोजनम् किं स्वरूपम् ?
उत्तरम् — काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥
'प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते' इति नियमात्
यदर्थोऽयमारम्भः तत् काव्यं कस्मै प्रयोजनायेति जिज्ञा-
सायां मम्मटोक्तमेव तत्प्रयोजनमाह स्वग्रन्थेऽपि काव्यं
यशसे इति। काव्यं = रमणीयार्थप्रतिपादकपदकदम्बम्
यशसे = कालिदासादीनामिव कीर्तिलाभाय (भवति)
अर्थकृते = अर्थस्य कृते, श्रीहर्षद्वारा धावकादीनामिव
धन प्राप्तये, व्यवहारविदे = व्यवहारस्य = लोकाचारस्य
विदे = ज्ञानाय लोकव्यवहारज्ञानाय, शिवेतरक्षतये - शिवात् =
कल्याणात् इतरद् = अन्यद् यदमङ्गलं तस्य क्षतये = निवारणाय,
कविर्हि काव्येन तत्तद्देवताः प्रसाद्य रोगदुर्ग्रहाद्युपद्रवान् क्षमयितुं
शक्नोति, यथा मयूरकविः सूर्यशतकेन काव्येन सूर्यं समाराध्य
नैजं कुष्ठरोगमशमयत्। सद्यः = काव्यश्रवण-पठनसमनन्तरमेव
परनिर्वृतये - परा = अत्युत्कृष्टाः लोकोत्तरा ब्रह्मानन्दस्वादसहो-
दरा निर्वृतिः = आनन्दः, सुख तस्यै = परमप्रीतये कान्ता =
सम्मिततया - कान्तया लावण्यादिना मनोहरया वनितया
सम्मितं तुल्यं कान्तासम्मितं तस्य भावस्तत्ता तया कान्ता-
सम्मिततया = प्रेयसीनिर्विकल्पतया, उपदेशयुजे - उपदेशस्य =
कर्तव्याकर्तव्यनिर्देशस्य युजे = योजनाय हितवाक्यप्रदानाय।

Renu Devi
16/09/20

राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया)

Page No.

शास्त्री-I खण्ड साहित्य -
अभिज्ञानशाकुन्तलम्
चतुर्थोऽङ्कः

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं न तनयाविश्लेषदुःखैर्नवैः ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदासप्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्यशास्त्रस्य चतुर्थोऽङ्कात् उद्धृतोऽस्ति। अस्मिन् श्लोके महर्षि कण्वः अद्य शकुन्तलां पतिगृहं प्रेषयिष्यन् तस्याः स्नेहातिशयात् वैक्लव्यमुपगतो महर्षिकण्वः तदीयप्रस्थानमनुसन्दधानो ब्रवीति -

व्याख्या - पतिगेहं गमिष्यन्त्याः शकुन्तलायाः स्नेहातिशयाद् विक्लवहृदयः कुलपतिः कण्वो निजमनसि विचारयति - अद्य शकुन्तला पतिगृहं गमिष्यतीत्यनुसन्धानमात्रेण तदीयविरहवेदनया जडीभूतं मे हृदयं चिन्तया वाढं व्याप्तोऽस्मि, मम स्वरश्च प्रवृत्तानां बाष्पाणां प्रवृत्त्या गद्गदो जातः, मम नेत्रे च समक्ष-विषयाग्रहणासमर्थमजायत। जन्मत आरभ्य तपस्तप्त्वा तपोवने निवसतो वीतरागस्यापि मम यदीदृगनिर्वचनीयं वैक्लव्यं तर्हि विषयासक्तस्य गृहस्थस्य आत्मजावियोगजन्यदुःखैर्जातस्य क्लेशस्य का कथा? अत्रव्यतिरेकानुप्रासाद्यो पात्त काव्यलिङ्गालंकाराः शार्दूलविक्रीडितं च छन्दः।

Renu Devi
16/09/20
राधा उमाकान्त सं० महावि०
सुखसेना, पूर्णिया।

उपशास्त्री-I खण्ड साहित्य तृतीय-पत्रम्
काव्यदीपिका

Date __/__/__

प्र०(1) मम्मटमतानुसारेण पर्यायः नामकः अलंकारस्य किं स्वरूपम्?
उत्तरम् - पर्यायनामकमलंकारः — एकं क्रमेणानेकस्मिन् पर्यायो-
ऽन्यस्ततोऽन्यथा।
यथा -
स्थिताः क्षणं पक्ष्मसु ताडिताधराः पयोधरोत्सेधनिपातचूर्णिताः
वलीषु तस्याः स्खलिताः प्रपेदिरे क्रमेण नाभिं प्रथमोदबिन्दवः॥
प्र०(2) विभावनाऽलङ्कारस्य किं स्वरूपम्?
उत्तरम् - विभावना विना हेतु कार्योत्पत्तिर्यदुच्यते। यथा -
अपमेघोदयं वर्षमदृष्टकुसुमं फलम्।
अतर्कितोपपन्नं वो दर्शनं प्रतिभाति मे॥
अत्र मेघोदयकुसुमरूपकारणयोरभावेऽपि वर्षफलरूप
कार्ययोरभिधानम्।

Renu Devi
16/09/20
राधाउमाकान्त सं० महावि० सुखसेना,
पूर्णिया।

Page No.

शास्त्री-II खण्ड साहित्य

उत्तरमेघः - सूक्तिव्याख्याभागः

Date ___/___/_____

प्र०(1) कान्तोदन्तः सुहृदुपगतः सङ्गमात्किञ्चिदूनः ॥

उत्तरम् - प्रस्तुतोऽइयं सूक्तिः महाकवि कालिदासप्रणीतस्य मेघदूतस्य खण्डकाव्यस्य उत्तरमेघस्यास्ति। अत्र यक्षः मेघं सम्बोधयति यत् त्वमलकायां मम गेहं गत्वा मत्प्रियामेवं संदिशेः "हे सौभाग्यवति! प्रियविरहेण विषीदतः पथिकान् सत्वरं भवनं प्रति गमनाय यः सम्प्रेरयति तादृशं निजवल्लभ तुल्यं संदेशदानार्थमागतं मेघं मामवगच्छ।" इत्येवं रूपेणोक्ते सति मत्प्रिया सावधाना भूत्वा त्वां सत्कृत्य मदीयं सन्देशमाकर्णयिष्यति। इति निर्देशं दृढयन्नाह यक्षः - हे मेघ! नारीणां कृते मित्रप्राप्तः प्रियतमसमाचारः प्रियजनसम्पर्कात् किञ्चिन्न्यूनो भवति। प्रियजनसमाचारं श्रुत्वा नार्यः प्रहृष्टान्तःकरणाः भवन्ति। इति सर्वतन्त्र सिद्धान्तः। ननु सन्देशमात्रश्रवणादस्याः को लाभः इत्याशङ्क्या - ऽर्थान्तरमुपन्यस्यन्नाह यक्षः -

हे सज्जन! प्रियतम समाचारः कान्तसंगमसमः प्रहर्षजनको भवतीति भावः।

Renu Devi
16/09/20

राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया।

Page No.